**दिनाङ्क :- 03.10.2026**
**प्रातः - 06:55**

## अथवार्ताः

### प्रधानमन्त्री स्मित

प्रधानमन्त्री नरेन्द्रमोदी ह्यः भारतीयविमानचालकेन कैप्टन् स्मित् मच्छार इत्येनन सह दूरभाषमाध्यमेन संवादं कृतवान्। सहचालकेन कृतस्य आक्रमणस्य प्रतिरोधं कुर्वता तेन फ्लायदुबई-विमाने दुबईतः तल-अवीव्-नगरं प्रति गच्छताम् अशीत्यधिकैकशतं यात्रिणां प्राणाः रक्षिताः। कैप्टन् मच्छार इत्येनन प्रधानमन्त्रिणे स्वस्य अनुभवस्य विस्तृतविवरणं प्रदत्तम्। सममेव घटनाक्रमे तस्मै साहस कुतः प्राप्तमिति कथितम्। प्रधानमन्त्री तस्य साहसं प्रशंसितवान्। तस्य शीघ्रस्वास्थ्यलाभाय शुभकामनाः च अयच्छत्। श्रीमोदी अवदत् यत् सम्पूर्ण राष्ट्रं तस्य स्वास्थ्यलाभाय प्रार्थनां करोति । प्रधानमन्त्री अवोचत् यत् "कैप्टन् स्मितः साहसेन यथासमयम् उचितनिर्णयेन क्षमतया धैर्येण च जनानां प्राणान् अरक्षत्।" प्रधानमन्त्री स्मितस्य साहसस्य प्रशंसां कुर्वन् अवदत् यत् देशः गर्वेण वक्तुं शक्नोति यत् भारतीयाः प्राणान् रक्षितुं स्वजीवनं संकटे स्थापयितुं सज्जाः भवन्ति। वार्तालापस्य समये भावुकः स्मितः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी तस्य सर्वाधिकः आदर्शः अस्ति, अथ च प्रधानमन्त्रिणः दूरभाष-संवादं प्रति गौरवानुभूतिः प्रकटिता।

### पीयूष गोयलः

वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः अमेरिकादेशस्य मिल्वौकी-नगरे जी-20 वाणिज्य-मन्त्रिणां सम्मेलनस्य समापनदिने वैश्विक-व्यापार-विकृतीभ्यः निवारणार्थं डब्ल्यू. टी. ओ.-इत्यस्यानुरूपं कार्याचरणाय आह्वानम् अकरोत्। संरचनात्मक-अतिरिक्त-क्षमतायाः उत्पादनस्य च विषये प्रवदन् श्रीगोयलः अवदत् यत् भारतं विश्वस्य द्रुतगत्या वर्धमाना बृहत्-अर्थव्यवस्था अस्ति, यत्र देशीय-याचनाधारित-अर्थव्यवस्था चत्वारि दशमलवोत्तर एक अरब जनानां सेवां करोति। सः अवदत् यत् भारतस्य विनिर्माणक्षमता तस्य देशीय-वैश्विक-आवश्यकतां पूरयति तथा च भारतस्य जी-20 अध्यक्षेन अभिधीयमानेषु क्षेत्रेषु संरचनात्मक-अतिरिक्त-क्षमता नास्ति।

### सर्बानन्द सोनोवालः

केन्द्रीय-पत्तन-नौवहन-जलमार्ग-मन्त्री सर्बानन्द सोनोवालः ह्यः भारतीय-नौवहन-निगमं, भारतं स्वावलम्बीकर्तुं, नौकायान-निर्माणस्य समुद्रीय-क्षमतायाः च वैश्विक-स्पर्धात्मकतायां च प्रमुखां भूमिकां निर्वोढुं आह्वयत्। एस्. सी. आई. इत्यस्य पञ्चषष्ठी वर्षाणां पूर्त्यवसरे आयोजितं समारोहं सम्बोधयन्, श्रीसोनोवालः भारतस्य ऊर्जायाः व्यापारस्य च सुरक्षायां एस. सी. आई. इत्यस्य भूमिकां, विशेषतः सद्यः एव विद्यमानस्य होर्मुज-जलसंधि-सङ्कटकालेतस्य भूमिकां प्रोत्साहितवान्।

### पञ्जाब- बी. एस्. एफ्.

पञ्जाब-राज्ये, सीमा-सुरक्षा-बलेन ह्यः तरन-तारन-क्षेत्रे द्वौ पाकिस्तानी-अवैधजनौ मारितम्। बी. एस्. एफ्. इत्यस्य सूत्रानुसारं ते अवैधरूपेण सीमायाः भारतीयभागं प्रति आगतवन्तः इति। नियुक्तैः सुरक्षाकर्मचारिभिः विरामाय पूर्वसञ्चेतनानन्तरम् अपि, ते आगतवन्तः तदनन्तरम् एव बी. एस्. एफ्. इत्येनेन गोलिकाप्रहारं कृतम् इति।

**एशियाक्रीडा**

एशियन-गेम्स' क्रीडा-महाकुम्भे ह्यः भारतीय मुष्टामुष्टिक्रीडकैः मल्लस्पर्धिभिः धनुर्धरैः च षट्स्वर्ण-पदकानि विजितानि। षोडश स्वर्ण पदकानि पंचविंशति रजतः पदकानि च समेत्य षट्सप्ततिः पदकैः भारतं तालिकायां पंचमस्थाने विद्यते।

**।। इति वार्ताः।।**